श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीपार्थसारथि सुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीपार्थसारथि सुप्रभातम् ॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥

वन्दे बृन्दावनान्ते मणिगणविलसत्सौधहर्म्ये गृहाढ्ये
सम्राजत्कैरविण्यास्तटभुवि घृणिमद्गोपुरे सालरम्ये।
आनन्दाख्ये विमाने मुनिगणविनुतं पार्थसूतं च रामं
रङ्गेशं श्रीनृसिंहं गजवरवरदं श्रीक्षितिभ्यां समेतम् ॥ 1 ॥

मातः श्रीर्जगतामशेषजगतां नाथस्य भर्तुः प्रिये !
तद्वक्षस्थलनित्यवासिनि ! सदा श्रीवेदवल्याह्वये !।
बृन्दारण्यनिवासियोगिसदने सम्भूय वारान्निधेः
मन्नाथामरभूरुहेण सहिते ! नैशं प्रभातं शुभम् ॥ 2 ॥

श्रीमद्वेदलतां श्रितामृतलतां बृन्दावने संस्थितां
सम्यग्दृष्टपरावरेण मुनिना संवर्धितां तद्धिताम्।
लब्ध्वा तां समुपेत्य दुग्धजलधेस्तद्दत्तनामा वसन्
मन्नाथाश्रितकल्पभूरुहविभो ! ते सुप्रभातं हरे ॥ 3 ॥

समस्तकल्याणगुणैकधाम्नः
स्वशक्तिलेशोद्धृतभूतलस्य।
प्रह्लादभक्तेः परिवर्धकस्य
मन्नाथनाम्नस्तव सुप्रभातम् ॥ 4 ॥

श्रीमत्कैरविणीसरोवरतटे नित्यं तपः कुर्वते
सम्यग्ज्ञानवतां वराय भृगवे दत्वा त्वभीष्टं वरम्।
लब्ध्वा तस्य सुतां जगत्त्रयमुदे तस्मै प्रसन्नस्य ते
मन्नाथाद्य हि सुप्रभातमखिलांस्त्रातुं प्रसीद प्रभो ॥ **5** ॥

श्रीमन् धराभरविमोचनदीक्षितं त्वां
सम्बोधयन्ति विधिशङ्करशक्रमुख्याः।
स्वामिन् ! जगत्त्रयविभो ! यदुवंशनाथ !
श्रीपार्थसूत ! भगवंस्तव सुप्रभातम् ॥ **6** ॥

भास्वान् विकासयति पङ्कजकुड्मलानि
पद्माकरेषु परिकूजितसारसेषु।
कूजन्ति पञ्जरशुकास्सह शारिकाभिः
श्रीपार्थसूत ! भगवंस्तव सुप्रभातम् ॥ **7** ॥

वीणां प्रगृह्य मुनिवाहनयोगिवर्यो
गानं करोति सहतुम्बुरुनारदाद्याः।
सङ्गीतवाद्यनिपुणास्तव सुप्रभात -
गाथाः पठन्ति यदुनन्दन ! सुप्रभातम् ॥ **8** ॥

ब्रह्मादयस्सुरपतिप्रमुखा दिगीशाः
स्वस्वाधिकारनियतास्तव सैन्यनाथाः।
सम्प्रार्थयन्ति तव सद्मपुरोविभागे
श्रीपार्थसूत भगवंस्तव सुप्रभातम् ॥ **9** ॥

गोपाङ्गनास्तव हि मङ्गलगीतकानि
गायन्ति कामशरपीडितगात्रयष्ट्यः।
गोपालबालककुलानि विसृज्य वत्सान्
त्वां प्रार्थयन्ति यदुशेखर ! सुप्रभातम् ॥ **10** ॥

स्नेहप्रतिस्नुतपयोधरभारयुक्ताः
गावः स्ववत्ससहिताः परितोषयुक्ताः।
वत्सान् विसृज्य च पयः परिदोहयन्ति
गोपालकास्तव यदूद्वह ! सुप्रभातम्॥ **11** ॥

बृन्दावने विहरतां पशुपालकानां
रक्षार्थमात्तवरवेत्र ! सुशङ्खपाणे !।
भ्रात्रा समेत ! सुमनोहर भूषणार्ह !
प्रोत्तिष्ठ पार्थरथपालक सुप्रभातम्॥ **12** ॥

बृन्दावनान्तरमनोज्ञवनान्तरेषु
नानातरुप्रवरशोभिजलाशयेषु।
कूजद्विहङ्गमगणेषु मधुव्रतानि
गायन्ति पार्थरथनायक ! सुप्रभातम्॥ **13** ॥

मन्दारकुन्दवरकैतकमाधवीनाम्
आमोदनिर्भरवनान्तरनिस्सृतोऽसौ।
मन्दानिलः प्रसरति प्रवरः प्रभाते
श्रीपार्थसूत भगवंस्तव सुप्रभातम्॥ **14** ॥

सम्फुल्लकैरवसरोवरनीरसंस्थाः
हंसास्सचक्रमिथुनास्सह सारसैश्च।
तीरे तु देशिकगणैस्सह संविवादान्
तन्वन्ति पार्थरथनायक ! सुप्रभातम्॥ **15** ॥

तद्देशिकाः सकलशास्त्रविदां वरिष्ठाः
त्वत्प्रोक्तदिव्यचरमार्थनिविष्टभावाः।
कासारयोगिमुखदेशिकसूक्तिनिष्ठाः
तिष्ठन्ति किङ्करकृतौ तव सुप्रभातम्॥ **16** ॥

श्रीभट्टनाथकृतिभिस्तव मङ्गलानि
शंसन्ति देशिकवरास्त्वमितप्रभावाः।
गोदासुसूक्तिभिरपि प्रतिबोधयन्ति
श्रीपार्थसूत भगवंस्तव सुप्रभातम्॥ **17**॥

सूर्योदये ग्रहगणास्त्वितरे सुरेन्द्राः
आज्ञां तवैव निजवैभवसम्प्रयुक्ताः।
सम्प्रार्थ्य तोषितुमिहाद्य जगत्पतिं त्वां
तिष्ठन्ति पार्थरथनायक ! सुप्रभातम्॥ **18**॥

नित्यार्चनां रचयितुं विविधोपहारान्
वस्तूनि वस्त्रवरदिव्यविभूषणानि।
सङ्गृह्य वैदिकशिखामणयः प्रभाते
तिष्ठन्ति पार्थरथभूषण ! सुप्रभातम्॥ **19**॥

काश्मीरकेसरयुतं हरिचन्दनञ्च
कस्तूरिकां च घनसारवरं गृहीत्वा।
द्वारि स्थितास्तव हि दासगणास्समस्ताः
श्रीपार्थसूत भगवंस्तव सुप्रभातम्॥ **20**॥

सम्फुल्लपङ्कजनवोत्पलकैरवाणि
सच्चम्पकैर्मरुवकैः कृतमालिकानि।
सङ्गृह्य तावकसमर्चनमादरेण
तिष्ठन्ति कर्तुमनघास्तव सुप्रभातम्॥ **21**॥

भाग्याधिकास्तव पदाब्जनिविष्टभावाः
पीताम्बराण्यपरिमेयविभूषणानि।
रत्नानि काञ्चनयुतानि समर्पयन्ति
श्रीपार्थसूत भगवंस्तव सुप्रभातम्॥ **22**॥

प्रातःप्रयुक्तनवनीतपयःफलानि
 मुद्गान्नलड्डुकमनोहरमिश्रितानि।
सोपायनानि च समर्पयितुं यतन्ते
 श्रीवैष्णवास्तव यदूद्वह ! सुप्रभातम् २३ ॥

भेरीमृदङ्गपटहानकगोमुखादि -
 वाद्यानि घोषयति दासगणस्तवाग्रे।
तिष्ठन्ति नर्तनपरा गणिकास्समस्ताः
 श्रीपार्थसूत भगवंस्तव सुप्रभातम् २४ ॥

हस्तीन्द्रमूर्ध्नि धृतकाञ्चनकुम्भतीर्थं
 छत्रावृतं विधृतचामरयुग्ममारात्।
श्रीमन् प्रभो ! तव हि मङ्गलमज्जनाय
 श्रीपार्थसूत भगवंस्तव सुप्रभातम्॥ 25॥

एकान्तिनश्च विमलाशययोगिवर्याः
 अध्यापकास्तव पदाब्जनिविष्टभावाः।
तिष्ठन्ति सन्निधिमुपेत्य भवत्पदाब्जे
 सेवार्थमर्जुनसखे ! तव सुप्रभातम्॥ 26॥

त्वत्सेवनाय सकलद्रविडागमानां
 वक्ता पराङ्कुशमुनिस्स्वपदप्रपन्नैः।
रामानुजोऽपि कृतनित्यसमस्तकृत्यः
 त्वद्द्वारि तिष्ठति विभो ! तव सुप्रभातम्॥ 27॥

उत्तिष्ठ लक्ष्मणगुरो ! सह सीतयाऽद्य
 धर्मं विवर्धय विभो ! जय पालयास्मान्।
दासान् कुरुष्व सहसा तव किङ्करांश्च
 ते सुप्रभातमधुना रघुवंशनाथ॥ 28॥

श्रीमन्गजेन्द्रवरदाश्रितपारिजात !
    श्रीवैनतेयभुजमूलविभूषणाढ्य !।
इन्द्रादिदेवगणपूजितपादपद्म !
    श्रीमन्वरप्रद ! सुरेश्वर ! सुप्रभातम् ॥ **29** ॥

श्रीमन्नृसिंह जगतां जनिहेतुभूत !
    सम्पालनान्तकरणादिषु जागरूक !।
अन्तःप्रविश्य च नियन्तृतया भवास्मान्
    श्रीमन्नृसिंह ! भगवंस्तव सुप्रभातम् ॥ **30** ॥

श्रीमन्नृसिंह तव मङ्गलमस्तु नित्यं
    सूर्येन्दुतारकसमानमहःप्ररोहैः।
नैशं तमःप्रसरमान्तरमप्यपास्तं
    स्वामिन्नृसिंह भगवंस्तव सुप्रभातम् ॥ **31** ॥

काव्योऽपि पूर्वदिशि संस्थितपर्वतस्थो
    वाचां पतिर्हिमकरोऽस्तमितो बभूव।
पक्षी निनादमपि पञ्जरगः करोति
    श्रीमन्नृसिंह भगवंस्तव सुप्रभातम् ॥ **32** ॥

श्रीपार्थसारथि रघूत्तम वेदवल्ली
    मन्नाथ सौम्यनरसिंह वरप्रदानाम्।
ये सुप्रभातमनिशं प्रपठन्ति तेषां
    ब्रह्मेश्वराद्यसुलभं सुलभं पदं स्यात् ॥ **33** ॥

॥ इति श्रीपार्थसारथि सुप्रभातं समाप्तम् ॥